Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## ॥ श्री जैनग्रन्थप्रकाशकसभा प्रकाशित ग्रन्थाः ॥

१ हारिभद्राष्टकवृत्ति ३२१ संवादपाठयुक्त-
वृत्ति ड्रोइंगपेपर ....२-८
" " ग्लेझपेपर ....२-०
२ संबोध प्रकरण.... .... ....३-०
३ हरिभद्रसूरिग्रन्थसंग्रह.... ....३-०
४ हारिभद्राष्टक प्रकरण (मूल).... ....०-४
५ स्याद्वादरहस्य पत्र सटीक.... ....०-१२
६ न्यायालोक सटीक.... .... ....५-०
७ अष्टसहस्री तात्पर्यविवरण.... ....१०-०
८ समुद्घाततत्त्व.... .... ....०-६
९ जैनन्याय मुक्तावली सटीक.... ....१-०
जैनन्याय मुक्तावली समु० भेगा ....१-४
१० नवतत्व विस्तरार्थ.... .... ....३-०
११ दंडक विस्तरार्थ.... .... ....१-०
१२ थी १७ धातुरत्नाकर भा. १ थी ६ ×
१८ खंडखाद्यलघुवृत्ति.... .... .... ×
१९ हैमधातुमाला.... .... ....४-०
२० जैनतत्त्वपरीक्षा.... .... ....०-४
२१ स्तोत्र भानु.... .... ....०-२
२२ स्याद्वाद बिन्दु.... .... .... ×
२३ द्रव्यलोकप्रकाश भाषान्तर प्रथम भाग ×
२४-२५ योगदृष्टि स. योगबिन्दु सटीक २-८
२६ १२५-१५०-३५० स्तवनो, योग-
दृष्टिसज्झाय द्रव्यगुणपर्यायराससंयमश्रे-
णिविचार-सज्झायादि संग्रह ....०-८
२७ पारमर्षस्वाध्याय ग्रंन्थसंग्रह (बुक)....०-६
२८ " " " (पत्राकार) ०-८
२९ सम्मतितर्कप्रकरण सटीक प्र० भा० ५-०
३० योगदृष्ट्याादिनवग्रन्थपद्यानुक्रम ....०-६
३१-३२-३३-३४ भाषारहस्य प्रकरण सटीक
योगविंशिका व्याख्या-तत्त्वविवेकविवरणसमे-
तकूपदृष्टान्तविशदीकरणप्रकरण-निशाभक्ते-
स्वरुपतो दूषितत्त्वविचारप्रकरण ....२-०

## ॥ मुद्र्यमाणा मुद्रयिष्यमाणाश्च शासनप्रभावका ग्रन्थाः ॥

१ सम्मतितर्कप्रकरण सटीक द्वि० भाग २ धर्मपरीक्षा सटीक ३ प्रतिमाशतक बृहट्टीका

प्राप्तिस्थानं-शेठ इश्वरदास मूलचंद, कीका भटपोल-अमदावाद.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

# श्रीरौहिणेयचरित्रं—श्लोकबद्धं ॥

( कर्त्ता—श्रीउपाध्यायजी देवमूर्त्तिः )

छपावी प्रसिद्ध करनार.

पंडित श्रावक हीरालाल हंसराज.

( जामनगरवाला. )

संवत्—१९६५. सने १९०८.

किं रु.—०—८—०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

☞ जामनगर जैनभास्करोदय छापखानामां छाप्युं.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीरौहिणेयचरित्रं ॥

( श्लोकबद्धं )

( कर्त्ता श्रीउपाध्यायजी देवमूर्त्तिः )

द्वेषेऽपि बोधकवचःश्रवणं विधाय । स्याद्रौहिणेय इव जंतुरुदारलाभः ॥ क्वाथोऽप्रियो-
ऽपि सरुजां सुखदो रविर्वा । संतापकोऽपि जगदंगभृतां हिताय ॥ १ ॥ तद्यथा—अस्त्यत्र
मगधे देशे । गंगापारे मनोहरं ॥ पुरं राजगृहं नाम्ना । महर्द्धिनरभूषितं ॥ २ ॥ तस्योपकंठे
वैभार-गिरिः सानुमनोरमः ॥ चौराणां च मुनीनां च । विश्रामस्थानकं सदा ॥ ३ ॥ स
पर्वतो वनस्पत्या । भाराष्टादशसंख्यया ॥ विराजितो निर्झरैश्च । मुक्ताहारैरिवाद्भुतैः ॥ ४ ॥
शब्दायंते दिवा यत्र । व्याघ्रसिंहाः सहस्रशः ॥ शिवानामपि फेत्कारै-र्भीषणो घूकघूत्कृतैः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ ४ ॥ चौराणां शिशवस्तत्र । रमंते सिंहशावकैः ॥ बलेन मंत्रयंत्राणा–मौषधीनां च नित्यशः ॥ ५ ॥ वसंति मुनयोऽनेके । वनेषु परितो गिरिं ॥ कंदमूलफलाहाराः । कुर्वंति विविधं तपः ॥ ६ ॥ या गुहा मध्यवर्त्तिन्यो । वंशजालिपरिवृताः ॥ वसंति तत्र चौराणां । कुलानि शतसंख्यया ॥ ७ ॥ उत्कृष्टः सर्वचौराणा–धमतश्चौरविद्यया ॥ चौरोरूप्यखुराह्वानो । नृशं साहसिको धनी ॥ ८ ॥ पादयोः परिधत्ते स । तस्करो रौप्यपादुके ॥ स्वच्छंदलीलया तत्र । पर्वते पर्वति नृशं ॥ ९ ॥ राजा राजगृहे राज्यं । विदधाति प्रसेनजित् ॥ निर्नीतिवैरिहंतापि । पुनश्चौरातिशंकितः ॥ १० ॥ गेहे गेहे भ्रमन् रात्रौ । चौरो रूप्यखुरः सदा ॥ यद्यत्सुखायते चित्ते । तत्तत्प्रकुरुते ध्रुवं ॥ ११ ॥

कलितास्तेन चौरेणा–रक्षकाः सकला अपि ॥ गेहे गेहे नवद्वारं । स रात्रौ कुरुतेऽनिशं ॥ १२ ॥ याति पक्षिवदुड्डीय । मठप्राकारमंदिरान् ॥ शस्त्राणि राजपुत्राणा–माछिनत्यपि पश्यतां ॥ १३ ॥ कथयित्वा स्वनेक्ताँ । दत्वावस्वापिनीमपि ॥ याति जागरयित्वा सो–ऽकलनीयश्च दुःसहः ॥ १४ ॥ स जानात्यनिकाबंधं । धाराबंधं मलिम्लुचः ॥ न तस्य लगते

For Private and Personal Use Only

घातो । विधत्ते किं नराधिपः ॥ १५ ॥ आजुहाव नृपश्चौरं । तं दत्वा शपथान् बहून् ॥ अ-
वीवदच्च मधुर–भाषया स नरेश्वरः ॥ १६ ॥ अस्मिन् पुरे त्वं विनाशं । मा कार्षीर्जातु मि-
त्र भोः ॥ अस्मद्दत्तं वरं ग्रासं । गृहाण त्वं खलु स्थिरं ॥ १७ ॥ तस्य ग्रासः कृतः कीदृक्
भुक्तहट्टे विशोपकः ॥ वसन्नेको वरो ग्रामो । इमकश्च गृहंप्रति ॥ १८ ॥ समं तेनेति चौरेण
। संधिर्जज्ञे क्ष्माभुजः ॥ उद्घाटितेन द्वारेण । जनः शेतेऽतिनिर्भयः ॥ १९ ॥ अथ प्रोवा-
च पितरं । रहो रूप्यखुरात्मजः ॥ परिधाप्ये त्वया तात । नाग्रो रजतपादुके ॥ २० ॥ श-
क्यते चौरिका कर्त्तुं । नात्मभिर्न्नृपसीमनि ॥ घृष्ट्वा वृथा याति रौप्यं । पादुकेऽयोमये कुरु ॥
॥ २१ ॥ इत्थं तु तद्वचः श्रुत्वा । सर्वश्चौरपरिच्छदः ॥ हसन्नुवाच लोऽन्येष । चौरेश तव नंदनः
॥ २२ ॥ अभिधा तस्य तैर्दत्ता । ध्रुवं लोहखुरो ह्ययं ॥ पितृवत्सोऽप्यभूच्चौर–विद्यानां केलि-
मंदिरं ॥२३॥ मृतो रूप्यखुरो राज–गृहे क्वाऽपि कदाप्यथ॥ चौरनाम न जानाति। जनोऽति-
सुखितः सदा ॥ २४ ॥ सर्वे ग्रासाः समायांति । तल्लोहखुरमंदिरे ॥ गुणेन तेन देशेऽपि ।
सर्वो गतभयो जनः ॥ २५ ॥ गेहे लोहखुरस्यापि । रोहिण्या सुषुवे सुतः ॥ भव्यलग्नेऽति-

गुणवां—स्तेजोभिर्भास्करोपमः ॥ २६ ॥ पुरो मौहूर्त्तिको लोह—खुरस्येत्यवदद्वचः लग्नप्रमा-
णतो नैष । चौरः प्रांतेऽतिधार्मिकः ॥ २७ ॥ वंदिष्यतेऽसौ भूनाथ—स्वर्णाश्वैर्दानवैरपि ॥ रौ-
हिणेयोऽभिधानेन । ज्ञास्यतेऽपि जगत्त्रये ॥ २८ ॥ परोपकारी धर्मात्मा । दयालुर्भवभीरुकः
॥ विद्यासु निपुणः प्रौढो । भवन्नेष भविष्यति ॥ २९ ॥

वचः सांवत्सरस्येति । श्रुत्वा लोहखुरोऽपि सः ॥ हृदि हर्षविषादाभ्या—मपूरिष्ट समंत-
तः ॥ ३० ॥ यदा प्रसूतो रोहिण्या । पुत्रो राजगृहे तदा ॥ श्रेणिकोऽपि समायातो । बेनात-
टपुरात्वरं ॥ ३१ ॥ लसौ प्रसेनजिद्दीक्षां । राजा श्रीश्रेणिकोऽभवत् ॥ गुहायां वर्द्धते चौर—
कुमारो रौहिणेयकः ॥ ३२ ॥ संजज्ञे सोऽष्टवार्षीयः । पठतिस्म कलाः कलाः ॥ पंडितस्या-
पि संदेहा—नुत्पादयति बुद्धिभिः ॥ ३३ ॥ स्वशब्दस्य परावर्त्तः । क्रियते येन केनचित् ॥ त-
दन्वशासीत्तच्चापि । येन रूपांतरं भवेत् ॥ ३४ ॥ विद्या जानाति सर्वेषां । वर्त्तकानां मनोहराः
॥ ददाति निर्णयं भाषा—रागाणामपि कोविदः ॥ ३५ ॥ याति पक्षिवदुड्डीय । क्षणेन व्योम्नि
तस्करः ॥ क्षणाद्विहाय स्वं रूपं । भवेत् श्वापदरूपभाक् ॥ ३६ ॥ विदधत्प्रौढनादं च । फ-

लान्यत्ति घनान्यपि ॥ आरुह्य भूरुहान् सर्वान् । सार्द्धमर्जुनकेतुभिः ॥ ३७ ॥ मृगाणां मध्य-
गः क्रीडां ॥ करोति कमलाननः ॥ विधाय रूपं मायूरं । नरिनर्त्यंबुदागमे ॥ ३८ ॥ तरणं
तारणं गंगा–नद्यां तेन च शिक्षितं ॥ पश्चादपि हि संसार–सागरं स तरिष्यति ॥ ३९ ॥ ए-
वं कलानां हेतोः स । यत्र तत्रापि संचरन् ॥ जानीतः पितरावेवं । स्वच्छंदं रमतेऽर्भकः ॥
॥ ४० ॥ औषधानि विचित्राणि । मंत्रयंत्रांश्च कोटिशः ॥ स जानाति परं नैव । हिंसाकर्म
मनागपि ॥ ४१ ॥ स्वयं कमपि नो हंति । हिंसकांश्चापि वारयन् ॥ रौहिणेयो लुब्धकानां
। क्षणात्पाशांश्छिनत्यपि ॥ ४२ ॥ स्थित्वा नष्टो याति वेगा–द्यतीनां वाश्रमेषु सः ॥ धर्मो-
पदेशं ते तस्य । ददते च श्रृणोत्यसौ ॥ ४३ ॥ जनको रौहिणेयस्या–न्यदा स्वीयपरिच्छदात्
॥ श्रुत्वात्मजस्य चरितं । पुत्रमाजूहवत् स्वयं ॥ ४४ ॥ पुरः स्थितं लोहखुरो । रौहिणेयं
तमूचिवान् ॥ विनाशयसि वत्स त्वं । गृहसूत्रं न शंसयः ॥ ४५ ॥ हसन्नूचे रौहिणेयः ।
पितरं लीलयेव हि ॥ आजन्मतोऽपि मयका । सूत्रं नोच्चालितं पितः ॥ ४६ ॥ मार्गं न पूर्व-
जाचीर्णं । व्रजसि त्वं मनागपि ॥ गृहसूत्रमिदं वत्स । सूत्रं नो कर्त्तनोद्भवं ॥ ४७ ॥ अस्मा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कं नवने जातो । जीवघातं करोषि न ॥ नाचरेर्मदिरापानं । चिखादिषसि नो पलं ॥ ४८ ॥
किंमस्रैर्निर्निरीक्षेथा । नुयास्मास्वनवन्नवान् ॥ अस्मद्भिक्तां न कुरुषे । स्वल्पामपि हि जातु-
चित् ॥ ४९ ॥ मद्भिर्वासैर्नूनं । निक्षां याचिष्यसे जनं ॥ सांवत्सरेण यत्प्रोक्तं । तद्बोन्नो-
ति किमन्यथा ॥ ५० ॥ किं तवाग्रे बहूक्तेन । सारं वाक्यमतः शृणु ॥ चलास्माकं मनोवृ-
त्त्या—थवा हत्यां गृहाण मे ॥ ५१ ॥ असुखानां निधिर्द्यूतं । द्यूतं कलहमंदिरं ॥ कुलशीलह-
रं द्यूतं । तेन दिव्याम्यहं कथं ॥ ५२ ॥ मद्यान्नवति वैकल्य—मपावित्र्यं तथैव च ॥ न तिष्टे-
ज्जठरे धान्यं । तत्पिबामि कथं पितः ॥५३॥ यैः श्वापदैः समंक्रीडां । करोमि विपिनेऽन्वहं ॥
तेषां मांसानि हत्वा तान् । तात खादाम्यहं कथं ॥ ५४ ॥ कुलक्रमसमायातं । स्तैन्यं चेन्न
करोम्यहं ॥ ततो यूयं प्रकुर्याच्च । मत्सरं हि ममोपरि ॥ ५५ ॥ रौहिणेयस्य वाक्यानि । श्रु-
त्वेति मुमुदेतरां ॥ पुत्रं लोहखुरो दोर्न्यां—मालिलिंग पुनः पुनः ॥ ५६ ॥ हृष्टश्चित्ते पुनः प्रो-
चे । चौरराट् निजमात्मजं ॥ शिक्षामेकां वत्स कुर्या—स्त्वं मे कुलहितावहां ॥ ५७ ॥ धर्म-
धूर्त्तो धरापीठे । श्रीवीरो विश्वविश्रुतः ॥ स्वर्णरत्नरौप्यमयं । कुर्याद्व्प्रत्रयं सदा ॥ ५८ ॥ त-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्रागतांश्च विश्वस्तान् । सर्वजातिसमुद्भवान् ॥ किंचित्किंचित् समाख्याय । स जनान् विप्रतारयेत् ॥ ५ए ॥ ते विप्रतारिताः संत—स्त्यक्त्वा जायांगजानपि ॥ भवेयुः सर्वविषय—व्यापारेषु पराङ्मुखाः ॥ ६० ॥ तल्लक्ष्मीग्रहणे लोभं । मा कार्षीस्त्वं मनागपि ॥ गृहीतुं शक्यते कैश्चि—द्यत्कापि न हि सा जनैः ॥६१॥ अंधीभवेः सदापि त्वं । वत्स तन्मुखवीक्षणे ॥ तद्वचःश्रवणेऽकर्ण—स्त्वं चेद्भक्तः पितुरथ ॥ ६२ ॥

कार्येऽमुष्मिन् वचोबंधं । विधेहि मयका समं ॥ तातादेशः प्रमाणं मे । रौहिणेयोऽप्यदोऽवदत् ॥ ६३ ॥ कियद्भिर्वासरैर्लोह—खुरः पंचत्वमाप्तवान् ॥ ग्रासास्तथैव ते तेऽस्य । समायांति गुहागृहे ॥ ६४ ॥ ये चौरा रोहिणेयस्य । संत्यन्ये परिपंथिनः ॥ चौरपंचत्ववार्त्तां ते—ऽभयं लेखादजिज्ञपन् ॥ ६५ ॥ लेखमध्ये च लिखितं ॥ ज्ञातास्मान्निर्मतिस्तव । तदात्मजस्य शावस्य । यद् ग्रासं यच्छसि स्वकं ॥ ६६ ॥ वैद्यैश्चिकित्स्यमानोऽस्ति । स्वामी वो रोगपीडितः ॥ ते न स्थ यूयमाहूता—स्तत्र च व्रजत द्रुतं ॥ ६७ ॥ आगच्छत पुनर्यूयं । जाते तस्मिन्निरामये ॥ मृते पुनर्नवं ग्रासं । करिष्यति च वो नृपः ॥ ६८ ॥ ज्ञात्वा लेखसमाचा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र–मन्नयेनेति वाक्यतः ॥ जना लोहखुरस्याथो–त्थापिताः शुद्धकहट्टतः ॥ ६९ ॥ ते गत्वा
कंदराद्वारे । निखिलाः खिन्नमानसाः ॥ रोहिणेयपि रुरोदोच्चै–र्वीक्ष्य तांश्च समागतान् ॥७०॥
रौहिणेयप्रसूः स्थित्वा । रुदंती तानन्नाषत ॥ ग्रामं विहाय किं यूय–मायाता अत्र कंदरे ॥
॥ ७१ ॥ वाक्प्रपंचं विधायेत्य–न्नयेन प्रहिता वयं ॥ समाकर्णय नो वाक्यं । मातरेकमथो
हितं ॥ ७२ ॥ मिलिष्यत्यवनीन्नर्त्तु–र्नवत्या यदि नंदनः ॥ तत्पालयिष्यति ग्राम–मन्यथा नै-
व न्नूधवः ॥ ७३ ॥

तेषां वचांसि श्रुत्वेत्य–रुदत्सा रोहिणीपुनः ॥ गृणंतीति गुणान् न्नर्तुः । परासोः प्रौढया
गिरा ॥ ७४ ॥ त्वांविनेयं न्नवन्नार्या । निराधारा रटत्यहो ॥ एकवारं स्वकीयं त–दर्शनं देहि
वल्लन्न ॥ ७५ ॥ न्नूमौ पंचाननस्याद्य । कुरंगा विचरंत्यहो ॥ न्नानवोऽद्य गता न्नानो–स्तम-
सः प्रसरोऽन्नवत् ॥ ७६ ॥ अद्यासने मृगपते–र्ददुः पारापताः पदं ॥ परेषां तस्कराणां य–छ्-
चनावसरोऽजनि ॥७७॥ गिरेर्मूले गुहा गुर्वी–राकलय्य स्वचेतसा ॥ प्रकटीन्नविता न्नर्त्त—
स्त्वां विना कोऽद्रिमस्तके ॥७८॥ दिवाप्यज्ञातमार्गाणां । निशीथे न्नवताविना ॥ दरीणां श्वा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पदैः शब्दै-र्मार्गं ज्ञाताद्य कः प्रिय ॥ ७९ ॥ दुर्गस्याधो मठस्याधः । स्वीयबाहुबलेन च ॥
त्वां विना वद चौरेंद्र । सुरंगां कः प्रदास्यति ॥ ८० ॥ प्राकारकपिशीर्षेभ्यो । हयानुत्तार्य हे-
लया ॥ गंगाजलं तारयित्वा-ऽनयद्गंगाजलाद्भवान् ॥ ८१ ॥ प्रधानस्यायसः खंडं ॥ ममाशा
तस्य कीदृशी ॥ अपूर्वेण भयेनाद्या-प्यारभ्य कलितो हि यः ॥ ८२ ॥ यो हि भाग्यवतां
ग्रासः । सोऽगमत्ताननु ध्रुवं ॥ मूलिकां वद काष्टाना-मथ त्वं रौहिणेयक ॥ ८३ ॥ सोचे प्र-
ति पुनः पुत्रं । सर्वेषामपि शृण्वतां ॥ स्ववंशस्य समाचारं । शृणु वत्स समाहितः ॥ ८४ ॥
यद्यपि स्वर्णकोट्येका । तस्कराणां गृहे भवेत् ॥ नष्टं तथापि मुषितं । द्रव्यं नव्यं हि स्थीय-
ते ॥ ८५ ॥ अर्जयिष्यसि यद्द्रव्यं । त्वमाशा तस्य कीदृशी ॥ ग्रासाः पितामहस्यापि । यद्या-
युर्जीवतस्तव ॥ ८६ ॥ तव स्थाने न किं जाता । पुत्र्येका प्रियलक्षणा ॥ वंध्या बभूव किं
नाहं । त्वया पुत्रेण को गुणः ॥ ८७ ॥ स्वमातृवचनैरेवं । प्रोत्कृष्टश्चौरविद्यया ॥ प्रमोदभाक्
रौहिणेय-श्चिंतयामास चेतसि ॥ ८८ ॥ अजातेनाथ जातेन । तेन पुत्रेण को गुणः ॥ भू-
नैरैर्यस्य तातस्य । जीवतोऽपि हि गृह्यते ॥ ८९ ॥ अहं पुत्रो जीवतो मे । वप्तुर्ग्रासोऽखि-



For Private and Personal Use Only

लो ययौ ॥ ब्रूते न्यायेन मातासौ । दोषोऽस्याः कोऽपि न ध्रुवं ॥ ९० ॥ ध्यात्वेति निःत्तसा-
रासौ । क्रीडां कुर्वन् गुहागृहात् ॥ लघूष्ट्ररूपं चक्रे च । मंत्रशक्त्या महत्तरः ॥ ९१ ॥ पुर-
प्रतोलीमारुह्य । चिरं स्थित्वोष्ट्ररूपभाक् ॥ प्रौढप्रासाद आसीनो । गीतं गायति निर्भरं ॥९२॥
गीतमध्ये वदत्येवं । रे प्राहरिक जाग्रहि ॥ चिंतय श्रीहरं चौरं । पुरमध्ये समागतं ॥९३॥
यो रौप्यखुरपुत्रोऽभू–च्चौरो लोहखुराह्वयः ॥ तत्पुत्र उष्ट्ररूपोऽहं । चौरविद्याबलोत्कटः ॥९४॥
लुप्ता यैर्मत्पितुर्ग्रासा । रासकान् दापयंति ते ॥ अभ्यासा अस्मदंगेऽप्य–न्यायस्यैव स्वभावतः
॥ ९५ ॥ पुरमध्येऽधनो लोको । निःश्वासांस्तु विमुंचति ॥ भूपतेः सकलो दोषः–सोऽभय-
स्यापि मंत्रिणः ॥९६॥ मां मा जानीत करभ–महं तस्करशेखरः ॥ वैभारगिरिवास्यस्मि ।
बहुसंतापकारकः ॥ ९७ ॥ लुप्यते आसनं यस्य । जीवतोऽनुक्रमागतं ॥ तदीयवदनं दृष्ट्वा ।
जलं पिबति कः क्षितौ ॥ ९८ ॥ ज्ञास्यते सकला बुद्धि–रभयस्यात्र मंत्रिणः ॥ राज्ञः परि-
च्छदस्यापि । शक्तिः स्थाम च सांप्रतं ॥ ९९ ॥

इत्यर्थगर्भं तद्वाक्यं । सर्वे शृण्वंति मानावः ॥ प्रदीपदीप्रधवल–गृहे राज्ञश्च वल्लभाः ॥

For Private and Personal Use Only

॥ १०८ ॥ शनैः शनैस्तं परितो-ऽमिलच्च बहुलो जनः ॥ स उत्थाय ततः स्थाना-न्महिषी-
वाटकान् ययौ ॥ १ ॥ तद्रूपं सहसा दृष्ट्वा । पुरसंकीर्णस्थानके ॥ महिष्यो युगपत्त्रस्ताः ।
प्रौढनादन्नयाकुलाः ॥ २ ॥ ये येऽन्नवन्महिषीणां । वाटकास्तत्र सोऽगमत् ॥ अन्वेति कांदि-
शिकाश्च । ता रटन्न पुरमध्यतः ॥ ३ ॥ पुरमध्येऽतिसंकीर्णे । महिषीपातिताज्जनात् ॥ धा-
टीपातादपि प्राज्यो-ऽन्नवत्कोलाहलो महान् ॥ ४ ॥ तदा श्रीश्रेणिकक्ष्मापो-ऽन्नवद्वातायन-
स्थितः ॥ तदोष्ट्रोऽपि समायातो-ऽनुव्रजन्महिषीव्रजान् ॥ ५ ॥ महिषीस्वामिनोऽपीयु-स्त-
त्र श्वाससमाकुलाः ॥ आरक्षकोऽस्ति तन्मध्ये । मुख्योऽसिव्यग्रहस्तकः ॥ ६ ॥ त्यक्त्वोष्ट्ररू-
पं सहसा-च्छिद्यारक्षकरादसिं ॥ अन्नजड्रौहिणेयः सो-ऽदृश्यन्नावं क्षणादपि ॥ ७ ॥ तत्रेति
क्रीमतस्तस्य । न्नानोरप्युदयोऽन्नवत् ॥ स तिष्ठन् जनमध्येऽपि । न कैश्चिदपि बुध्यते ॥ ८ ॥
क्रीमता रौहिणेयेन । कलितोऽन्नयमंत्रिराट् ॥ नालक्षि त्वन्नयेनाथ । रौहिणेयः स चौरराट्
॥ ९ ॥ अध्वानो महिषीरुद्धा । मर्त्यकोटिसमाकुलाः ॥ न कोऽपि तेन कुत्रापि । गंतुं क्र-
ममपि क्षमः ॥ १० ॥ गच्छता तेन चौरेण । प्रणम्यान्नयमंत्रिणं ॥ क्षचे लोकोऽल्पमपि मे ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मा करोतु भयं स्फुटं ॥ ११ ॥ राजानं राजपुत्रं च । मंत्रिणं दंडपाशकान् ॥ नटिष्याम्यनिशं रात्रौ । रात्रावागत्य लीलया ॥ १२ ॥

इत्युक्त्वा स ययौ तेषां । पश्यतामपि चौरराट् ॥ जग्मिवान् कोऽपि न पृष्टौ । सर्वकोऽपि जिजीविषुः ॥ १३ ॥ पिधाय कर्णौ पाणिभ्यां । तातादेशं प्रमाणयन् ॥ वीरसमवसरणं । दृष्ट्वा चेत्युत्सुकोऽचलत् ॥ १४ ॥ चरणे चरतस्तस्य । तीक्ष्णो भग्नश्च कंटकः ॥ शशाक तेन नो गंतुं । स एककमपि क्रमं ॥ १५ ॥ एकेन पाणिना कर्णं । पिधाय त्वरितं ततः ॥ द्वितीयेनोद्दधारासौ । कंटकं पादतो निजात् ॥ १६ ॥ गंभीरध्वनिना प्रौढं । श्रीवीरस्य जगद्गुरोः ॥ रौहिणेयोऽशृणोद्वाक्यं । व्याख्यानं कुर्वतस्तदा ॥ १७ ॥ महीतलास्पर्शिपादा । निर्निमेषविलोचनाः ॥ अम्लानमाल्या निःस्वेदा । निरुजांगाः सुरा इति ॥ १८ ॥ बहुश्रुतमिदं धिग्धि–गित्याशूद्धृतकंटकः ॥ पिधाय कर्णौ पाणिभ्यां । तथैवापससार सः ॥१९॥ बहुमूल्यं वीक्षमाण–स्तत्खड्गं गृहमाप्तवान् ॥ प्रणम्य जननीं प्रोचे । कुरु शांतं मनस्तव ॥ ॥ २० ॥ मातरारक्षककरात् । खड्गमेतन्मया हृतं ॥ पितुः प्रयोजनस्यार्थे । त्वच्चित्तधृतिहेतवे



For Private and Personal Use Only

॥ २१ ॥ न्युंछनानि विधायाशु । प्रदीपं सप्तवर्त्तिभिः ॥ विधाय तिलकं माता । पुत्रायेत्या-
शिषं ददौ ॥ २२ ॥ कुलदीप कुलाधार । वंशाढ्यविभूषण ॥ इत्थमेव सदा क्रीडे-स्तत्पुरे स-
प्तवर्त्मसु ॥ २३ ॥ स्तनंधयोऽसि त्वं वत्स । मृत्युशंकां तु मा कृथाः ॥ तथा कुर्यां यथा चं-
द्रे-ऽभिधां स्वां लेखयेद्द्रुतं ॥ २४ ॥ मृते त्वयि न मे शोकः । शंका त्वद्धरणे पुनः ॥ धृतश्चे-
त्तद्भता कीर्त्तिः । पैत्री पैतामही पुनः ॥ २५ ॥ रणे चेद्वीक्षिते वत्स । कांदिशिकोऽभवद्भवान्
॥ कुलं त्वया ततो वप्तु-र्मदीयं च विगोपितं ॥ २६ ॥ सिंहीकुक्षौ सिंहवंशे । यद्युत्पद्येत
जंबूकः ॥ धिक् धिक् तं कातरं दीनं । जीवितं तस्य च वृथा ॥ २७ ॥ सहकारतरोराल—
वाले चेत्किंशुकोद्भवः ॥ कृष्णवक्रमुखात्तस्मात् । फलाशा वद कीदृशी ॥ २८ ॥ राजा वा
युवराजो वा । मंत्री वा दंडपाशिकः ॥ नीता भवंति चेत्खेदं । ततो वैभारमापतेः ॥ २९ ॥

पितुः प्रयोजनं कृत्वा । नत्वा च जननीक्रमौ ॥ मातुः शिक्षा गृहीत्वा चा-चलद्भूयः स
चौरराट् ॥ ३० ॥ सुवर्णनरवद्देदी-प्यमानतनुदीधितिः ॥ धरागताहर्मणिव-द्दुरालोकश्च तेज-
सा ॥ ३१ ॥ शारदपूर्णिमाचंद्र-वक्त्रविस्मापितव्रजः ॥ तिलप्रसूननाशश्च । खंजरीटोपमांब-



॥ १५ ॥

कः ॥ ३२ ॥ वाक्यपीयूषकुंडाज–वक्त्रपार्श्वस्थितेन च ॥ पन्नगाकृतिना वेणी–दंडेनापि वि-
राजितः ॥ ३३ ॥ सांप्रतं चौरमुख्योऽयं । पश्चात्पुण्यवतामपि ॥ रराजेतीव पुंड्रेण । भृशं सं-
शोभितालकः ॥ ३४ ॥ दाडिमीफलबीजाभ–दंतश्रेणिर्मनोज्ञवाक् ॥ कंबुग्रीवः पीवरांसः ।
पृथुवक्षाश्च सत्ववान् ॥ ३५ ॥ युगोपमभुजः शंख–चक्रांकितकरद्वयः ॥ कुलिशाकृतिमध्य-
श्च । रौहिणेयो प्रसन्नधीः ॥ ३६ ॥ गूढगुल्फो मृगजंघः । पद्माकृतिपदद्वयः ॥ गुंजापुंजप्रभा-
पूर–विराजितनखक्रमः ॥ ३७ ॥ सुवेषः सरलः शांतः । सुप्रसन्नः सदाकृतिः ॥ शौंडीरः सा-
हसी शूरः । समर्थः समरेऽजयः ॥ ३८ ॥ रागज्ञो रूपवान् रम्य–रामारागनिकेतनं ॥ रौहि-
णेयोऽरातिजेता । पुरे राजगृहेऽविशत् ॥ ३९ ॥ नवभिः कुलकं ॥ क्रीतं द्रव्येण धवल–गृह-
मेकं मनोरमं ॥ सुधाधवलितं सप्त–भूमिकं भूरिभूषणं ॥ ४० ॥ वृद्धा तत्र युवत्येका । क्षा-
मकुक्षिर्बुभुक्षया ॥ प्रतिपन्नांबिकात्वेन । कृता च गृहरक्षिका ॥ ४१ ॥ वैभारपर्वते पूर्व–पुरु-
षोपार्जितं धनं ॥ कत्यप्यानाययामास । स्वर्णरूप्यादिकं रहः ॥ ४२ ॥ वाणिज्यं मंडितं ते-
न । द्रव्येण प्रकटं पुरे ॥ अमंडयच्च स द्रव्य–हीनान् दत्वा निजं धनं ॥ ४३ ॥ वाहनानि च

पूर्यंते । शतसंख्यानि सागरे ॥ प्रयांति दिक्षु सर्वासु । वस्तुपूर्णान्यनांसि च ॥ ४४ ॥ सितो-
दरेणेव तेन । जनतानां यदृच्छया ॥ लक्षसंख्यानि दीयंते । व्याजेन इविणानि च ॥ ४५ ॥
दुःखान्यनाथडुःस्थानां । दीर्यंते तेन हेलया ॥ वैरिणोऽपि हि रक्ष्यंते । राज्ञश्च शरणागताः
॥ ४६ ॥ दीयंते चार्थिसार्थेन्यः । पट्टकूलतुरंगमाः ॥ दारिद्र्यं निर्धनानां च । दीर्यत धनदान-
तः ॥ ४७ ॥ व्यवहारी रौहिणेयः । ख्यातोऽनूदिति तत्पुरे ॥ इत्थं प्रकारैः सकलै–रर्जयच्च घ-
नं धनं ॥ ४८ ॥ नत्तीर्णा चौरिका चित्ता–द्वाणिज्ये ललगे मनः ॥ वाणिज्येनार्ज्यते यत्स्व–
मन्योपायैर्धनैर्न तत् ॥ ४९ ॥ लान्नलोन्नेन वाणिज्यं । एवंकुर्वन्निरंतरं ॥ बहूनां स पिपर्त्ति-
स्म । रौहिणेयो मनोरथान् ॥ ५० ॥ गतेषु षट्सु मासेषु । स्तैन्यसंस्मृतिकारकाः ॥ अमि-
लन् कथयांचक्रे । तैश्चारक्षकचेष्टितं ॥ ५१ ॥ त्वयका चौरिकात्याजि । निश्चिंतो दंरूपाशिकः
॥ चौरघरट्टमात्मानं । कथयत्येष बंदिन्निः ॥ ५२ ॥ रौहिणेयो निशम्येति । ध्यातवान्मानसे
निजे ॥ यावदेतान् दिनान् सेहे । अद्यपश्चात्तु नो सहे ॥ ५३ ॥ आरक्षकस्याद्य मया । गेह-
द्वारं नवं निशि ॥ कर्त्तव्यमिति स ध्यात्वा । प्रेषयामास तान्नरान् ॥ ५४ ॥ आरक्षकगृहे द्वा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्र–मर्धरात्रे प्रदाय सः ॥ सर्वस्वं जगृहे शीघ्रं । मुक्तं यात्वा स्ववेश्मनि ॥ ५५ ॥ श्रेणिक-
स्याश्वरत्नं चा–पहृत्यातीववेगतः ॥ बीभत्सतेस्म तत्कात्र–द्वारे चौरावतंसकः ॥ ५६ ॥ ग-
त्वा जागरयामास । पांमवांश्चापि यामिकान् ॥ उत्तिष्ठतार्श्वयत भो–स्तुरंगं दंडपाशिकं ॥५७॥
यामिकाः सहसोत्थाया–ऽनिरीक्ष्यापि च वाम्वं ॥ पदं निरीक्षितुं लग्नाः । कृत्वा दीप्रप्रदीपि-
काः ॥ ५८ ॥ आरक्षकगृहेऽगच्छत् । पदस्तुरगसंभवः ॥ कोलाहलं प्रकुर्वाणा । मिलिता अ-
श्वयामिकाः ॥ ५९ ॥

एतावतापि ग्रासेना–मुष्य वांछा न पूर्यते ॥ ततो हरति भूपस्या–श्वरत्नमिति वा-
दिभिः ॥ ६० ॥ सुप्तश्चतुरके दंड–पाशिकस्तैः क्रुधोद्धतैः ॥ धृतस्तत्रैव तुरगे–ऽश्ववारश्च कृतो
द्रुतं ॥ ६१ ॥ प्रभाते पुरतो राज्ञः । स चानीयत पांमवैः ॥ यथा रजोत्सवे लोकै–रजोत्सव-
नरेश्वरः ॥ ६२ ॥ सचिवेनाभयेनोचे । न चौरो घटते ह्ययं ॥ विचारयोग्यं किमपि । कारणं
स्थूलमस्ति भोः ॥ ६३ ॥ यावत्तत्कारणं वेद्मि । नाहं सम्यक् प्रकारतः ॥ युष्माभिर्न विधा-
तव्यः । कलिस्तावत्सभागणे ॥ ६४ ॥ आरक्षको गृहे यातो । वाक्येनाभयमंत्रिणः ॥ गृहि-



For Private and Personal Use Only

एया ज्ञणितः स्वामिन् । किमर्थं गृहमागतः ॥ ६५ ॥ तुरंगस्य मिषेणै तैः । पांम्वैस्तव मंदिरं ॥ लुंटितं सकलं नास्ति । तद्दंमस्तेषु दीयते ॥ ६६ ॥ पांमवान् सकलान् धृत्वा । हन्म्यद्य निशितासिना ॥ ययौ तुरंगशालासु । तलारक्षो ज्ञणन्निति ॥ ६७ ॥ रे रे चौर तलारक्ष । तिष्टास्माकं पुरः स्थिरः ॥ एवं ब्रुवंत शस्त्राएया–दायोत्तस्थुश्च पांडवाः ॥ ६० ॥ रे वराक ज्ञवान् दास–स्ते चामी पांडवा वयं ॥ जगत्त्रयेऽपि विख्यातं । विहितं ज्ञारतं हि यैः ॥ ६ए ॥ कुर्युः शस्त्राणि ऊात्कारं । पक्षयोरुज्ञयोरपि ॥ अज्ञयो धीसखो ज्ञूयः । कुरुतेस्म निवारणं ॥ ७० ॥ तेषां प्रतिभुवो गृह्णन् । मंत्री कलिकृतौ पुनः ॥ चौरं न वीक्षते क्वापी–त्यधर्षद्दंडपाशिकं ॥ ७१ ॥ लोकास्थानसमासीनो मूर्ध्नयोश्च वलं क्षिपन् ॥ आरक्षको जनश्चास्ति । तस्करोऽपि पुरः स्थितः ॥ ७२ ॥ चेच्चटिष्यति हस्ते मे । कथमप्येष तस्करः ॥ व्यपोहिष्यामि तद्दोषं । ज्ञव्यरीत्या स्वचेतसः ॥ ७३ ॥ स नातिष्टत्पापमति–र्लुंटितेन गृहेण मे ॥ वैरं तु कारयामास । मयका सहः पांम्वैः ॥ ७४ ॥

एवं विज्ञाषमाणं तं । निरीक्ष्य जनताग्रतः ॥ रौहिणेयो जहासोच्चै–रुदमीयत पक्षिवत्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ७५ ॥ जगृहे गच्छता तेन । तलारक्षकमस्तकात् ॥ पट्टकूलं च भूपेन । प्रदत्तं शीर्षवेष्टनं ॥
॥ ७६ ॥ प्रासादशृंगमारुह्य । बभाषेऽथातिनिर्भयः ॥ विभाषसे किं वराक। ज्ञातं स्थाम म-
या तव ॥ ७७ ॥ तव खड्गं मया छिन्नं । अग्रेऽपि तव हस्ततः ॥ मयैव पातितं छात्रं । मंदि-
रे तव कातर ॥ ७८ ॥ हृत्वाश्वं पांडवैर्वैरं । मयैव तव कारितं ॥ संप्रत्येवोत्तरीयं ते । मया त-
व मस्तकाद्धृतं ॥ ७९ ॥ विलंबं कुरु मा दंड–पाशिकाधम सत्वरं ॥ युद्धायायांति ये वीरा–
स्तानाकारयतु भवान् ॥ ८० ॥ किंचित्क्रीडां पुनः कुर्वे । यथा तैः सममादरात् ॥ बुद्धिदाना-
य च पुन–राह्वयाभयमंत्रिणं ॥ ८१ ॥ मां गृहितुं न शक्नोषि । बालमेकाकिनं भवान् ॥ क्व
ते चौरघरट्टत्व–मद्य भोः सकलं गतं ॥ ८२ ॥ अमिलद्बहुलो लोक–स्तत्रायातोऽभयोऽपि च
॥ तदा परिग्रहेणोचे–ऽभयो वीतभयस्त्विति ॥ ८३ ॥ बीटकस्य प्रसादं चेत् । कुरुषे मंत्रि-
राज नः ॥ वयं व्यपनयामोऽस्य । तच्चौरस्याभिधामपि ॥ ८४ ॥ प्राह चौरो निशम्येति ।
यद्येवं कुरुत स्फुटं ॥ तत्किमप्यनृणीभावं । भुक्तस्य भजताखिलाः ॥ ८५ ॥ वस्त्रव्याघ्रैश्च यु-
ष्माभिः । कणिकाया विनाशनात् ॥ भक्षितं निखिलं राज्यं । श्रेणिकस्य क्षमाभुजः ॥८६॥

For Private and Personal Use Only

नविष्यत्यन्यमित्रो मे । युष्मासु निखिलेषु यः ॥ मातुस्तारुण्यहारी स । प्रतापाढ्यो न हि ध्रुवं ॥ ८७ ॥ क्षत्रियाः शौर्यसदनं । यूयमत्र समागताः ॥ शृंगपुछपरिभ्रष्टाः । शंडा वा साह-सोत्कटाः ॥ ८८ ॥ बीटकं त्यज्यमानाया । रंडाया नवति ध्रुवं ॥ संग्रामस्य तु वेलायां । बीटकं याच्यते कथं ॥ ८ए ॥ कारणं विद्यते स्थूल–मथवा बीटकार्थने ॥ देशत्यागस्य कार्ये-ण । तद्धि याचत निश्चयात् ॥ ए० ॥

बीटकेन त्रिपत्रेणा–थवा किं काष्ठनक्षणं ॥ अतीव प्रापिताः खेद–मत्र यूयं करिष्यथ ॥ ए१ ॥ काहलानां निनादोऽनू–इणतूरध्वनिर्गुरुः ॥ प्रतापिनां च शूराणां । सिंहनादोऽतिदु-स्सहः ॥ ए२ ॥ धोंकारैर्धनुषां विश्वं । संजज्ञे बधिरं किल ॥ बाणपूरेण संछन्नः । सहस्रकिर-णस्तदा ॥ ए३ ॥ वीराः कुर्वंति हुंकारान् । स्वीयाहंकारसंनृताः ॥ गछंति व्योममार्गेण । शब्दयंते च सायकाः ॥ ए४ ॥ निस्त्रिंशादीनि शस्त्राणि । चंचत्तेजोमयानि च ॥ सौदामिनी-व झात्कारं । कुर्वंति बहुकांतिन्निः ॥ ए५ ॥ केऽपि लोष्टानि काष्ठानि । केऽपि केऽपि महछिलाः ॥ केऽपि नल्लांश्च सबलान् । केऽपि नानायुधानि च ॥ ए६ ॥ जनाः सर्वान्निसारेण ।



For Private and Personal Use Only

मुंचंतिस्म महाबलाः ॥ रौहिणेयंप्रति तदा । रुध्ध्वा च परितोऽधिकं ॥ ए७ ॥ औषधीमंत्र-
यंत्राणां । बलेन न तदंगके ॥ जनमुक्तं प्रहरणं । लगतिस्म मनागपि ॥ ए८ ॥ अन्यच्च ते-
षां लोकाना—मेवान्योऽन्यं क्षणादपि ॥ चौरमंत्रबलोद्भूतः । कलिः समुदपद्यत ॥ एए ॥ प्रा-
सादाग्रस्थितश्चौर—स्तान् वीक्ष्य कलितत्परान् ॥ कलिकारकवत्प्रीतो । हसति प्रौढशब्दतः ॥
॥ १०० ॥ कलिं कृत्वा स्थितानूचे । तानेवं परिपंथिकः ॥ कुर्वाणाः समरं यूयं । किं स्थिताः
स्वयमेव भोः ॥ १ ॥ अहं युष्मद्वशे नास्मि । तत्खेदं याथ किं वृथा ॥ अन्यच्च दहनं मु-
क्त्वा । दहामि सकलं पुरं ॥ २ ॥ दत्तो मया तु लोकस्य । स्वकीयो दक्षिणः शयः ॥ स पी-
ड्यते जनः सर्वो । नैति किं चापि मत्करे ॥ ३ ॥ युग्मं ॥ परिछदः कः किं स्थाम । कोऽ-
न्यः पितृन्निर्मम ॥ ग्रासोऽद्यत परं तेन । विनाशं न करोम्यहं ॥ ४ ॥ क्षिपामि हेलया
प्रौढ—शिलां हन्म्यखिलान् जनान् ॥ रटंति तु प्रियास्तेषां । किमप्येति न मत्करे ॥ ५ ॥ त-
स्माद्यास्याम्यहं भूयः । पश्याम्यारक्षकस्त्वसौ ॥ एवं ज्ञात्वा जल्पयता—हंदिन्निर्बिरुदावलिं
॥६॥ उक्त्वेति चौरोऽदृश्योऽभू—ज्जनो निजनिजे गृहे ॥ जगाम चौरचरितैः । सुप्रीतोऽपि च

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विस्मितः ॥ ७ ॥ उद्वाहोऽथ भवन्नस्ति । परिग्रहपतेर्गृहे ॥ तत्रारक्षकरूपं स । कृत्वातिष्ठन्म-
लिम्लुचः ॥ ८ ॥ तावद्वार्त्तापि न कृता । यावदूढौ वधूवरौ ॥ द्वयोऽभूत्सन्निवेलायां । द्राग्
लात्वा च वरं ययौ ॥ ९ ॥ वस्त्रादि सर्वमादाय । तेन नग्नीकृतो वरः ॥ दंडपाशिकगेहस्य ।
गवाक्षेऽमोचि भीतिभाक् ॥ १० ॥ कस्मादपि समाचारं । ज्ञात्वा स्वीयाप्तमानवात् ॥ ज-
वात्परिग्रहेशेना–वेष्टयतारक्षकगृहं ॥ ११ ॥ अहं गवाक्षमध्येऽस्मि । शिखिनं कोऽपि मास्य-
तु ॥ इति प्रोक्ते वरेणापि । महान् कोलाहलोऽजनि ॥ १२ ॥ निःश्रेणिं मंडयित्वोच्चैः । परि-
ग्रहपतिः स्वयं ॥ वरमुत्तारयांचक्रे । देहक्षेमं च पृष्टवान् ॥ १३ ॥ बंदं गृह्णात्यसौ दंड—पा-
शिकः पुरमध्यतः ॥ प्रदास्यामो वयं मान–ममुष्यातीवमंजुलं ॥ १४ ॥ तस्मिन्नवसरे मंत्रि–
समीपे दंडपाशिकः ॥ अभूत् कोलाहलं श्रुत्वा । साभयो गृहमाययौ ॥ १५ ॥ अभयस्तान्
जगादैव–मत्र किं यूयमागताः ॥ लुंटाका इव किं गेहं । लुंटिष्यथ बलोत्कटाः ॥ १६ ॥ कु-
त्र यूयं च कुत्रैष । पार्श्वेऽभून्मम सांप्रतं ॥ एष एवास्ति किं लब्धो । युष्माभिः पांडवैरपि
॥ १७ ॥ त्वं चेद्रक्षसि तद्रक्ष । बंदग्राही पुनस्त्वसौ ॥ अस्य गेहे वरो लब्धः । प्राहुरेवं च ते



For Private and Personal Use Only

न्नटाः ॥ १८ ॥ परिग्रहपतिः प्रोचे । श्रृणु वाक्यं ममान्नय ॥ साक्षिणो न न्नवंत्यक्ष्णोः । कदापि जगतीतले ॥ १९ ॥ बंदग्राही चौरराजो-ऽन्यायवान् जनवंचकः ॥ एक एव तलारक्षो। नास्ति कोऽपि परः पुरे ॥ २० ॥ मुषितं पत्तनं सर्व-मनेनैव च मायिना ॥ पक्षपातं करोषि त्व-मस्य ड्विणलोन्नतः ॥ २१ ॥ अंगारवृष्टिश्चंशाच्चे-त्तमसः प्रसरो रवेः ॥ हुतभुक्संन्नवो नीरा-त्ततः किं क्रियतेऽन्नय ॥ २२ ॥ त्वत्तोऽप्यन्यायवृत्तिश्चे-त्तत्को न्यायकरः क्षितौ ॥ वृत्तिश्चेच्चिर्न्नटान्यत्ति । ततः किं क्रियतेऽन्नय ॥ २३ ॥ अन्यायिनमिमं चेत्त्वं । मंत्रिन् जुगुप्ससेऽधुना ॥ पश्चादपि हि हत्वान्य-राज्ये यास्याम्यहं ध्रुवं ॥ २४ ॥

एवं विवादे संजाय-मानेऽसौ चौरसत्तमः ॥ व्यक्तीन्नूय बन्नाणेत्य-न्नयं मंत्रिमहत्तमं ॥ ॥ २५ ॥ मयारक्षकरूपेण । प्रजहेऽसौ वरोत्तमः ॥ मयैवान्नरणान्यस्ये-मानि लातानि वीक्ष्यतां ॥ २६ ॥ संग्रामं मयका साकं । कृत्वा बघ्नीत मां समे ॥ अन्यथा शीर्षमाघ्राय । यात गेहे स्वके स्वके ॥२७॥ चलेन्न स्थानकादेष । घातं मुंचामि यंप्रति ॥ इत्युक्त्वा स्तंन्नितस्तेन । तस्करेण परिग्रहः ॥२८॥ शस्त्राणि हर्षतस्तेषां । सर्वेषां चौरराट् तदा ॥ आदत्तेस्म चालंका-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र-संघातं च तदंगतः ॥ २९ ॥ विधाय जननीशिक्षा-मेवं तस्करशेखरः ॥ वितीर्य मौक्तिकं हार-मन्वयं च नमोऽकरोत् ॥ ३० ॥ जगाद चैवं मंत्रींद्र । त्वं कल्पवृक्षसन्निभः ॥ अहं करीरतुल्योऽस्मि । का स्पर्धा मे त्वया सह ॥ ३१ ॥ पुनर्मुख्यः प्रधानेषु । त्वमेव मतिवैभवैः ॥ तवैव शस्यते बुद्धिः । सकलेऽपि जगत्त्रये ॥ ३२ ॥ अहं प्रतिदिनं नत्वा । त्वां करिष्यामि भोजनं ॥ भवत्पादावप्रणम्य । नियमो भोजनस्य मे ॥ ३३ ॥ उपलक्षसि मां चौरं । यदा मंत्रींद्र लक्षणैः ॥ मरणांतं तदा स्तैन्यं । त्यक्ष्याम्येव न संशयः ॥ ३४ ॥ हसित्वोवाच सचिव-स्त्वं मया देहलक्षणैः ॥ लक्षितश्चौरराजाद्य । का मतिस्त्वत्परीक्षणे ॥ ३५ ॥ सत्यप्रतिज्ञश्चौरेंद्र । सत्यवाचा युधिष्टिरः ॥ स्वयं मुखेन यत्प्रोक्तं । तत्पाल्यं वचनं त्ववा ॥ ३६ ॥ चौरेण भणितं मंत्रिन् । वागस्माकं हि तादृशी ॥ पृथिव्यां यादृशो मेरु-र्लोहरेखा च यादृशी ॥ ३७ ॥ सतानीकसुतो नाहं । चंडप्रद्योत एव वा ॥ ययोः कूटं विधाय त्वं । मतिमानभवो भुवि ॥ ३८ ॥ रात्रिरद्यापि बहुला । विनिर्जित्य परिग्रहं ॥ जगाम निजमावासं । सुखेनापि स तस्करः ॥ ३९ ॥ त्यक्तं सर्वमपि स्तैन्यं । दयायां स्थापितं मनः ॥ नानाप्रकारै र-

For Private and Personal Use Only

मते । नवेय राजगृहं पुरं ॥ ४० ॥ वाचां बंधे स्थितश्चौर–शेखरः सोऽनुवासरं ॥ निरीक्षितं विना भुंक्ते । नैव ह्यन्नयमंत्रिणं ॥ ४१ ॥

अन्यदान्नयमंत्रींशो–ऽगमच्छ्रीजिनमंदिरे ॥ देवपूजां विदधते । विलंबश्चान्नवद्बहुः ॥ ४२ ॥ जगामान्वन्नयं सोऽपि । तस्करोऽतिबुभुक्षितः ॥ पूजोपहारमादाय । श्राद्धवेषधरो द्रुतं ॥४३॥ कृता निषेधिका तेन । विशता न जिनगृहं ॥ परितः समवसृतिं । प्रदत्ता न प्रदक्षिणा ॥४४॥ अन्नयेन ततो ज्ञातं । मंत्रिणा श्राद्धवेषन्नृत् ॥ मलिम्लुचोऽथवा धूर्त्तः । कोऽप्ययं जगतीतले ॥ ४५ ॥ साधर्मिक त्वां वंदेऽह–मित्युक्तेऽन्नयमंत्रिणा ॥ लोकन्नाषानुगा तस्मै । चक्रे तेन नमस्कृतिः ॥ ४६ ॥ लक्षणैरिन्निरन्नयो । मतिमान् मानसे स्वके ॥ ज्ञातवान् महिषीपालं । तं न श्रावकसत्तमं ॥ ४७ ॥ गृहीत्वा दक्षिणं बाहुं । तस्य चौरस्य धीसखः ॥ चचाल वार्त्तयन् स्वीय–मंदिरं प्रति तं पथि ॥ ४८ ॥ उपलक्षिता मया यूय–मद्य देव न संशयः ॥ पालय स्वीयवचनं । यदि त्वं सत्यवागसि ॥ ४९ ॥ इत्युक्ते मंत्रिणा प्राह । चौरः साहसबुद्धिमान ॥ किं वाचः पालनं मंत्रि–न्नथवा किमुपलक्षणं ॥ ५० ॥ यूयं वृद्धिं गता राज्ञः । स-

न्नायां बुद्धिवैन्नवाः ॥ व्यवहारिणो वयं मंत्रिन् । न्नङ्का मुग्धमानसाः ॥ ५१ ॥ युष्मन्नम-
स्यां जानीमः । कथंचन वयं हि न ॥ प्रश्नं चेद्विद्यते किंचि–त्तद्व्यक्तं वद मे पुरः ॥ ५२ ॥
युष्मत्पार्श्वे निषीदंति । सन्नायां ये तु कोविदाः ॥ युष्मडुक्तं विजानंति । ते नरा नेतरे क्ति-
तौ ॥ ५३ ॥ क्षणेन पुरतो राज्ञ–स्तावुन्नौ चौरधीसखौ ॥ आयातौ नृपसदसि । वेष्टितौ न-
रकोटिन्निः ॥ ५५ ॥ विधाय प्रणतिं नृप–मुवाचान्नयमंत्रिराट्॥ असौ स तस्करो येन । लुं-
टितं सकलं पुरं ॥ ५६ ॥ नवं नवं करोत्येष । रूपं प्रतिदिनं नृप॥ चरित्रमस्य चौरस्य । न-
रेंड् वचनातिगं ॥ ५७ ॥ पुरारक्षो विनटितो–ऽनेन चौरेण हेलया ॥ नृत्यं कृत्वा वरं लात्वा ।
स्वरूपेणैष नष्टवान् ॥ ५८ ॥ जिनपूजां कुर्वतो मे । समागाज्जिनमंदिरे ॥ निषेधिकामकृत्वै-
व । प्राविशच्चैत्यमध्यतः ॥ ५९ ॥ परितः समवसृतिं । नादादेष प्रदक्षिणां ॥ योग्योऽसौ द-
क्षिणायाश्च । तदा ज्ञातं मया स्फुटं ॥ ६० ॥ श्रेणिकोऽपि तदोवाच । जैनं जयति शासनं ॥
विवेकविनयाचार–विचारगुणमंमितं ॥ ६१ ॥ तेजोमया हि सर्वेऽपि । ग्रहनक्षत्रतारकाः ॥ न
सूर्येण समोऽप्येको । वर्ण्यते कोविदैर्यथा ॥ ६२ ॥ तथा जगत्यां सर्वेऽपि । संति धर्माः मनो-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





हराः ॥ न जैनधर्मतुल्योऽस्ति । कोऽपि धर्मो जगत्त्रये ॥ ६३ ॥ गणेशं कथयित्वापि । तित्तरं जिह्वया स्वया ॥ हत्वा खादंत्यहो मूर्खा । मिथ्याधर्मरता नराः ॥ ६४ ॥ अथवा नागपंचम्यां । नागमर्चंति गोमयं ॥ प्रस्फुरंतं चलंतं च । प्रत्यक्षं घ्नंति भोगिनं ॥ ६५ ॥ जिनधर्मपरित्यक्ता । ब्रुवंतः परटा इति ॥ बब्बूलफलिका बह्वी—र्भक्षयंत्यविवेकिनः ॥ ६६ ॥ जिनधर्मविहिना ये । मानवाः स्युर्महीतले ॥ ते देवगुरुपूजायाः । समाचारं विदंति न ॥ ६७॥ अतः श्रीमन्महावीर । विवेकविनयान्विते ॥ मतिः स्फुटा जैनधर्मे । मम भूयाद्भवे भवे ॥ ॥ ६८ ॥ भूपालमंत्रिणोर्वाक्य—मेवमुक्तं शृणोति सः ॥ अमिलन्नागरो लोक—स्तं निरीक्षितुमाकुलः ॥ ६९ ॥ अवदत्सकलो लोक । एकवाक्येन वीक्ष्य तं॥ एतं कथं रुद्धवांस्त्वं । मंत्रींद्र वद सत्वरं ॥ ७० ॥

रौहिणेयोऽभिधानेन । रमाक्रीडानिकेतनं ॥ प्रसिद्धः पुरवासीभ्यः । सभ्यलोकसुरद्रुमः ॥ ७१ ॥ दत्ते क्षीणाति वा स्वर्ण—कोटिमेष नरोत्तम ः॥ शुल्कहट्टे ददात्येष । द्रव्यलक्षं न संशयः ॥ ७२ ॥ वणिक्पुत्रा घनाः संति । भूपस्य व्यवहारिणः ॥ संप्रेष्यतां निजा दूता—स्ता-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाकारयत द्रुतं ॥ ७३ ॥ परोपकारी पुण्यात्मा । पापदोषविवर्जितः ॥ दुर्बलानामनाथानां
विश्रामो ह्येष ते पुरे ॥ ७४ ॥ यो न जानाति देवेन्यो । मानवोऽर्चितुमार्जवात् ॥ न जा-
नात्यथवा कर्तुं । सेवां वो जङ्कत्वतः ॥ ७५ ॥ न चायात्यथ युष्माकं । बुद्धौ यो दक्षतागु-
णैः । स सर्वो घटते चौरः । किं मंत्रिन् पुरमध्यतः ॥ ७६ ॥ युग्मं ॥ रौहिणेयममुं मुंच ।
। जङ्कं व्यवहारिणं ॥ अथ चेन्नो चलिष्याम—स्तद्वयं जवतः पुरात् ॥ ७७ ॥ जनवाचं निश-
म्येत्य—जयः प्राह विषमधीः ॥ जगना वयं गृहीत्वामुं । जना! व्रजत सत्वरं ॥ ७० रौहिणेयो
बन्नाणैवं । किं यात्वा क्रियते गृहे ॥ कलंकं मेऽपनयामुं । सत्यं वासत्यमद्य जोः ॥ ७ए ॥
आकर्षयामि भुजगं । फटाटोपोत्कटं घटात् ॥ गृह्णामि गोलमयसो—ऽग्नितप्तं दक्षिणे करे ॥
॥ ७० ॥ खदिरांगारपूर्णे वा । कुंभे झंपां ददाम्यहं ॥ स्वीयनिर्मलजावत्वा—द्विषं खादामि वो-
ल्बणं ॥ ७१ ॥ सकलस्यापि देवस्य । पिबामि कोशमादरात् ॥ निजमेवंप्रकारेण । कलंकमप-
नयामि जोः ॥ ७२ ॥ हसित्वाथाजयोऽवादी—ज्जाने त्वच्चरितं समं ॥ अग्निना दह्यसे नैव । त्वं
न सर्पैश्च खाद्यसे ॥ ७३ ॥ न बद्ध्यते जवान् पाशै—र्विषं न प्रगमेत्तव ॥ निःशूकत्वाच्च धै-

For Private and Personal Use Only

र्यान्न । प्रनवंति सुरा अपि ॥ ७४ ॥ मंत्रप्रन्नावतो नीरं । करोति शिखिनं नवान् ॥ शपथं तं कुरुष्व त्वं । यमहं कारयामि न्नोः ॥ ७५ ॥

नमुक्ते रौहिणेयेन । तदेका दीपधारिका ॥ पुंसा कलावतैकेन । निर्मिता बहुयत्नतः ॥७६॥ बहुदोरकसंचारै–र्विस्मापितबहुप्रजा ॥ मनोज्ञरूपसंयुक्ता । नूषणैश्च विन्नूषिता ॥ ७७ ॥ पिनष्टि दंतान् सैकस्य । दोरकस्य हि चालनात् ॥ केनापि दोरकेणैषा–सिप्रहारं विमुंचति ॥ ॥ ७८ ॥ यंत्रेणैकेन सा नृत्येत् । केनापि कुरुते स्मितं ॥ केनापि रुदितं कुर्यात् । केनाप्युत्फुल्ललोचना ॥ ७९ ॥ नत्पादयति सा मोहं । केनापि जनमानसे ॥ नपायेन समानीता । सायाता मंत्रिणः स्मृतौ ॥ ८० ॥ मंत्रिणानायिता संस–न्मध्ये सा दीपधारिका ॥ चौरसंहारिणी नाम्ना । खड्गखेटकधारिणी ॥ ८१ ॥ आनीतायां च तस्यां हि । चौरमूचे स धीसखः ॥ कुरु त्वमस्या देव्या न्नोः । प्रणतिं न्नक्तिनिर्न्नरः ॥ ८२ ॥ चौरो न्नविष्यसि त्वं न । चेत्साधुश्च न्नविष्यसि ॥ गृहीष्यति तदा नाम । तवाप्येषा न संशयः ॥ ८३ ॥ रौहिणेयस्तदोवाच । मंत्रिणं शृणु धीसख ॥ मुक्त्वा जिनमहं नान्यं । नमामि स्थिरमानसः ॥ ८४ ॥



For Private and Personal Use Only

लोकं भाजय पश्य त्व–मात्मना सदृशं समं ॥ त्वं मंत्रींडो नरेंद्रस्य । मिथ्यात्वस्य समाश्र-
यः ॥ ए५ ॥ अग्रेऽपि हि त्वया यक्षः । पूजितोऽसंख्यमानवैः ॥ अग्रे जवननाचारं । श्राद्धैः
कारयसि त्वकं ॥ ए६ ॥ नित्यं स्वलक्षणैरेजिः । शुद्धसम्यक्त्वधारिणां ॥ तथा श्रीवीतरागस्य
। जक्तं जाणयसि स्वकं ॥ ए७ ॥ कुर्वेऽस्याः शपथं नाहं । श्रावको जातु निश्चयात् ॥ इत्यु-
क्त्वा चिंतयित्वा च । पुनराह स तस्करः ॥ ए८ ॥ शपथांश्चेत्करिष्यामि । चाग्रहात्तव संप्र-
ति ॥ आलोचनां गृहिष्यामि । पुनः सुगुरुसन्निधौ ॥ एए ॥ चिरं तेऽहं सहिष्यामि । कोपं
मरणकारकं ॥ लगिष्ये न पुनर्देव्याः। पादयोर्मंत्रिसत्तम ॥ ३०० ॥ दुःप्रापं जवलक्षेऽपि । स-
म्यक्त्वं याति येन मे ॥ प्राणत्यागेऽपि सचिव । विधास्यामि हि तन्न हि ॥ १ ॥ श्रुत्वेति वा-
क्यं चौरस्य । मुमुदे श्रेणिको नृपः ॥ साधर्मिकोऽयं मंत्रिन् मे । चौरो न घटते ह्यसौ ॥२॥
संसत्समक्षं चौरः स । पुनरूचेऽतिनिर्जयः ॥ जनानां पश्यतां मंत्रि–न्नृतं मां कुरु वानृतं ॥
॥ ३ ॥ इत्युक्ते पूजिता तूर्णं । पांचाली मंत्रिणा सुमैः ॥ अतीवरम्यमदिरा–वारिणा स्नापि-
ता स्वयं ॥ ४ ॥ यस्याः परिमलेनाप्य–चेता जवति मानवः ॥ तत्स्नात्रमदिरावारि । पायि-

तश्चौरशेखरः ॥ ५ ॥ पिबतः स्नात्रपानीयं। पांचाली तस्य मस्तके ॥ घातं मुमोच खड्गस्य। रज्जुसंचारयोगतः ॥ ६ ॥

इतश्च सोऽपि मदिरा–पानघूर्णितलोचनः ॥ विसंज्ञः पतितः पृथ्व्यां । लोकैश्चामंस्त स मृतः ॥ ७ ॥ हाहाकारः कृतः सर्वै–र्लोकैस्तद्भक्तितत्परैः ॥ अश्रुपातश्च मुमुचे । तस्य शोकेन पीडितैः ॥ ए ॥ अविचारपरा नृपाः ।कथ्यंते शास्त्रकोविदैः ॥ न तद्व्यलीकं भवति । युगांतेऽपि महीतले ॥ १० ॥ जनतेत्युक्तिवाचाला । जगाम स्वस्वमंदिरे ॥ अभयः सज्जयां- चक्रे । प्रासादं सप्तभूमिकं ॥ ११ ॥ सुधाधवलितं रम्यं । चंद्रोदयविराजितं ॥ कर्पूरागुरुक- स्तूरी–धूपधूपितमध्यकं ॥ १२ ॥ पिहिता पट्टकूलेना–कीर्णा पुष्पोत्करेण च॥ मुक्ता प्रासा- दमध्ये च । शय्यैकातिसुकोमला ॥ १३ ॥ स्वामी जातस्त्वमस्माकं । कैः पुण्यैस्त्रिदिवेऽत्र भोः ॥ विहितं जन्मनि प्राच्ये । स्वं पुण्यं वद नः पुरः ॥ १४ ॥ शिक्षामेवंविधां दत्वा । च- तस्रश्च वरांगनाः ॥ मालांकितकरा मुक्ताः। शय्यापादचतुष्टये ॥ १५ ॥ गीततालानुमानज्ञः। प्रवीणो नृत्यकर्मणि ॥ गांधर्वादिः समग्रोऽपि । संप्रदायो व्यमोचि च ॥ १६ ॥ इतः स म-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दिरापाने–नोन्मत्तो रौहिणेयकः ॥ स्वापितस्तत्र शय्याया–मुत्पाद्यान्नयमंत्रिणा ॥ १७ ॥ गतेऽथ मदिरोन्मादे । सचेताः सोऽन्नवत्क्षणात् ॥ तुर्व्यं सुरविमानेन । गृहमैक्षिष्ट सुंदरं ॥१८॥ स्त्रियो विलोकिता देवी–सन्निन्ना रूपबंधुराः ॥ नरा देवोपमा रूप–सौंदर्यगुणशालिनः ॥१९॥ अस्मिन्नवसरे देव्यः । कृत्रिमाः पुष्पस्त्रग्धराः ॥ ऊचुः पुरः समागत्य । प्रौढेन ध्वनिना तकं ॥ २० ॥ स्वर्गोऽयं पंचमः स्वामिन् । विमानं सर्वसुंदरं ॥ तस्याधिपत्यं संजातं । तव पुण्यप्रन्नावतः ॥ २१ ॥

एता वयं कलत्राणि । ते चतस्त्रोऽपि सुंदर ॥ एते सर्वेऽपि ते देवाः । सर्वदादेशकारिणः ॥ २२ ॥ प्राच्यजन्मकृतं पुण्य–मादौ नः पुरतो वद ॥ पश्चात्स्वर्गसमाचारं । यथा कुर्मो वयं तव ॥ २३ ॥ जप्तस्त्वया महामंत्र–स्तपस्तप्तं त्वयाथवा ॥ दानं दत्तं सुपात्रे वा । यद्विमानाधिपोऽन्नवः ॥ २४ ॥ मरणांतं वा त्वया क्वात्रं । पातितं वा जनगृहे ॥ अस्मिन् गात्रेऽथवा पीडा । कापि सेहे त्वया प्रन्नो ॥ २५ ॥ धारातीर्थेऽथवा प्राण–त्यागो हि विदधे त्वया ॥ सत्यं वद त्वं कैः पुण्यै–रस्माकं नायकोऽन्नवः ॥ २६ ॥ इतोऽन्नयोऽपि मंत्रीह । वणिजः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पुरवासिनः ॥ नागाख्यं रथिकं चैव । समाहूयागतोऽस्ति च ॥ २७ ॥ तेषामग्रेऽस्ति कथय-
न् । चरितं शृणुतैकदा ॥ रौहिणेयस्य प्रश्नात्तु । यूयमुज्वलत द्रुतं ॥ २८ ॥ रौहिणेयो निश-
म्याथ । देवीवाक्यान्यचिंतयत् ॥ अचीदं बुद्धिविज्ञानं । किमप्यन्नयमंत्रिणः ॥ २९ ॥ चौर-
राजश्चंचलश्च । लोकसंतापकारकः ॥ मादृशोऽपि यदि स्वर्गं । याता तद्दुर्गतौ हि कः ॥ ३० ॥
ख्यातानि यानि वीरेण । लक्षणानि दिवौकसां ॥ दृश्यंते तानि नैतासु । देवीषु हि मनाग-
पि ॥ ३१ ॥ आसां शुष्यंति पुष्पाणि । पादौ च स्पृशतो भुवं ॥ मेषोन्मेषं प्रकुर्वाते । लोच-
ने चातिचंचले ॥ ३२ ॥ देवांगनाविमानादि । सर्वं कृत्वापि कृत्रिमं ॥ ज्ञातुं मम मनोवृत्तिं ।
धृत्वानीतोऽहमत्र वै ॥ ३३ ॥ प्रदास्याम्यहमेतासा–मुत्तरं रम्यमद्य वै ॥ चिंतयित्वेत्युवाचार्यं
। देवदेवांगनाः प्रति ॥ ३४ ॥ वासो ममान्नवद्भ्ये । पुरे राजगृहे सदा ॥ रौहिणेयाभिधान-
स्य । प्रकृष्टव्यवहारिणः ॥ ३५ ॥ श्रीवीरजिनपार्श्वेऽन्नू–न्मम चेतः सदैव हि ॥ गमनं तत्र
न प्राप्त–मंतरायेण केनचित् ॥ ३६ ॥ संयमोपरि श्रद्धान्नू–त्तपस्तप्तं सुदुस्तपं ॥ पुनस्तस्मि-
न् पुरे मंत्र्य–न्नयोऽन्नूत् श्रेणिकात्मजः ॥ ३७ ॥ दत्तः कलंको मे तेन । व्यलीकः -स्तैन्यसं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवः ॥ पायितोऽहं विषं क्रोश–मिषेणातीवभङ्कः ॥ ३८ ॥ दत्तः प्रहारः शीर्षे च । देव्या
निस्त्रिंशसंभवः ॥ दीक्षामनोरथश्चित्ते–ऽभून्नष्टोऽभाग्यतस्तदा ॥ ३९ ॥ गंधोत्कटैः सुमनसै–
र्वीतरागो मयार्चितः ॥ दत्तं दानं सुपात्रेभ्यः । परमश्रद्धयान्वहं ॥ ४० ॥ व्यलीकोऽपि कलं-
कश्च । दत्तः सेहे क्षमाभृता ॥ एतैः पुण्यैर्विमानेऽस्मि–न्नहं सुरवरोऽभवं ॥ ४१ ॥ जजल्पु-
स्ताः पुनर्देव्यः । सहास्माभिरहोनिशं ॥ मनोरथाधिकं भुंक्ष्व । सुखं विषयसंभवं ॥ ४२ ॥
विमानेऽत्र सुरो योऽभूत् । पुरा यूयं तदंगनाः ॥ मम स्थ जननीस्थाने । युष्माकं चाप्यहं
सुतः ॥ ४३ ॥

श्रुत्वैवं तौ स्तस्तदा नाग–गोभद्रव्यवहारिणौ ॥ पुनर्देवो बभाणैवं । वचो निर्णयरूपकं ॥
॥ ४४ ॥ व्यवहारो न यत्रास्ति । जननीतनुजन्मनोः ॥ स्वर्गेणापि न मे कार्यं । तेन मे पा-
पदायिना ॥ ४५ ॥ रूपसौभाग्यतो यासां । चलंति यतयोऽपि हि ॥ न ताभिः क्षुभितः किं-
चि–द्रौहिणीकुक्षिसंभवः ॥ ४६ ॥ नागेन गत्वा कथितं । श्रेणिकस्य क्षमाभुजः ॥ चरित्रं स-
कलं तस्य । चित्तविस्मयकारकं ॥ ४७ ॥ श्रेणिकोऽपि समागत्या–भणत्तं रौहिणेयकं ॥ ध-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





र्गगार विचारज्ञ । मम मंतुं क्षमस्व न्नोः ॥ ४८ ॥ साधर्मिकस्त्वमस्माकं । मंत्री किमपि वेत्ति न ॥ इतो वर्द्धापनं जातं । श्रीवीतरागसंन्नवं ॥ ४९ ॥ वीरं समवसृतं ज्ञात्वा । मोक्षलक्ष्मीप्रदायिनं ॥ प्रमोदपूर्णः संजज्ञे । पुरवासी जनोऽखिलः ॥ ५० ॥ रौहिणेयोऽग्र संयोज्य । पाणी प्रोवाच मंत्रिणं ॥ देवानामपि जित्वर्यै । बुद्ध्ये ते नमोऽस्तु मे ॥ ५१ ॥ इयं ते वारुणी मंत्रिन् । कुर्गतिच्छयवारिणी ॥ कुर्वतोऽप्यपकारं मे । नपकारः कृतस्त्वया ॥ ५२ ॥ ममाशावर्द्धनो मंत्रि—न्नसावायस्त्वया ददे ॥ विमानं कुर्वतापि मे । विमानं ढौकितं त्वया ॥ ॥ ५३ ॥ सर्वमेतत्त्वया चक्रे । मां ज्ञातुं मंत्रिपुंगव ॥ तव बुद्धिर्जनोत्कृष्टा । गुरोरपि वचोऽतिगा ॥ ५४ ॥ महिमा तव हस्तस्य । मंत्रीश्वर महत्तरः ॥ यद्दत्तासवयोगेन विमानमन्नवन्मम ॥ ५५ ॥

अपराधो मया मंत्रिन् । यः कृतो वचनातिगः ॥ तेनापि ते प्रसादेन । साधुर्जातो जगत्त्रये ॥ ५६ ॥ नपकारकरः कोऽपि । त्वत्तो नान्यो जगत्त्रये ॥ मया पुरं विनटितं । त्वयाहं पायितोऽमृतं ॥ ५७ ॥ शृणवमात्य म्रियंते ये । जीवंतोऽपि नराः क्षितौ ॥ महावीरप्रसादेन । ते



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जायंतेऽजरामराः ॥ ५८ ॥ त्वयाहं पायितो यस्तु । क्रोशो देव्याः स तूत्तमः ॥ जातोऽहं तेन निर्दोषो । यत्त्वत्पाणिप्रभावतः ॥ ५९ ॥ देवोऽभणत् करे देव्या । असियोंऽतिगुणो हि सः॥ तेन मे मस्तकाद्दोषः । सर्वोऽप्युत्तारितः क्षणात् ॥ ६० ॥ खड्गप्रहारो यो दत्तो । देव्या मे मस्तकेऽनया ॥ परमार्थस्वरूपेण । स मे संसारतारकः ॥६१॥ लोकाः शृण्वंतु सर्वेऽपि । चौरोहं चौरवंशजः ॥ मातृपितृपक्षशुद्धः । देवानामपि दुर्धरः ॥६२॥ गंतुं नो दत्तवान् वीर-सभायां जनको मम ॥ इयत्कालं ततस्तेन । वंचितोऽहं सदैव हि ॥ ६३ ॥ तद्वाक्यस्यानृणीभूतः । कृतश्चाभयमंत्रिणा ॥ भवपारं व्रजिष्यामि । लात्वा दीक्षामथाहकं ॥ ६४ ॥ एकेन वीरवाक्येन । यदाहं बुद्धिपाशतः ॥ छुटितोऽथ ततस्तस्य । श्रोतुमिच्छामि वाग्भरं ॥६५॥ अभयोऽप्यवदद्वीर-वाक्यानि च श्रुतानि भोः । यानि तान्येव यशसा । कीर्त्या च फलितानि ते ॥ ६६ ॥ चतुर्धा बुद्धयो या हि । वर्त्तंते वसुधातले ॥ सर्वासामप्यहं तासां । निधानं पुण्ययोगतः ॥ ॥ ६७ ॥ मयापि मतिभिस्ताभि-र्न निर्णीतो भवानहो ॥ मद्यैर्नाप्यभवन्मत्तः । स्त्रीभिश्चापि न वाहितः ॥ ६८ ॥

For Private and Personal Use Only

अथ चौरोऽवदन्मंत्रिन् । स्वप्नं लब्धं मयाधुना ॥ तत्र जानाम्यहं यत्त्वं । श्वेतांब्यां स-
चिवोऽभवः ॥ ६९ ॥ तवांगरक्षकश्चाहं । समादेशकरोऽभवहं ॥ नित्यं पृष्टानुगामी च । सत्व-
वान् सरलाशयः ॥ ७० ॥ पार्श्वेऽन्यदा प्रधानस्य । मायावी जनवंचकः ॥ योगींद्ररूपधारी च ।
धूर्त्त एकः समाययौ ॥ ७१ ॥ स स्वीयेन गुरुत्वेन । मानाभ्युत्थानदानतः ॥ तेन सन्मानि-
तोऽतीव । स्वभावो हि सतामसौ ॥ ७२ ॥ एकदावसरं लब्ध्वा । स आगमनकारणं ॥ पृष्टः
प्रधानवर्येण । सोऽप्याख्यातिस्म तत्पुरः ॥ ७३ ॥ वनं कौतुकसंभारं । नानाश्चर्यमनोहरं ॥
विचित्रौषधीवल्लीभि–र्वृक्षैश्चापि समाकुलं ॥ ७४ ॥ आयासि चेद्वने तत्र । स्वर्णसिद्धिं ददा-
मि तत् ॥ बह्वाश्चर्यकरा विद्या । मंत्रांश्च शतसंख्यकान् ॥ ७५ ॥ अनापृच्छ्य कुटुंबं स्वं । य-
यौ तमनुयोगिनं ॥ लोभाभिभूतः सचिवो । लोभो हि दुरतिक्रमः ॥ ७६ ॥ उल्लंघ्य बहुलां
भूमिं । योगी सचिवमूचिवान् ॥ अपायस्थानकं ह्येत–द्वनं प्रेतवनोपमं ॥ ७७ ॥ कृतांततुल्य-
रूपा हि । भिल्लानामत्र कोटयः ॥ भयानकाश्च भल्लूका । व्याघ्रसिंहाः सहस्रशः ॥ ७८ ॥
अदृशीभूय चेदत्र । गम्यते वै ततो वरं ॥ गमनस्य प्रकारोऽत्र । कांतारे नान्यथा नृणां ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ७९ ॥ चिक्षेपांजनमित्युक्त्वा । स योगी तस्य नेत्रयोः ॥ तत्प्रभावेण सचिवो । व्याघ्ररूप-
त्वमाददे ॥ ८० ॥ योगी स निश्चलं कृत्वा । तं व्याघ्रं स्तंभिनीबलात् ॥ आरुरोह सुखं तेन ।
 पंथानमतिवाहयत् ॥ ८१ ॥ मार्गेऽथ गच्छतस्तस्य । मिलितौ राक्षसावुभौ ॥ वृद्धेन राक्षसे-
नोक्तं । यासि योगिन् क्व मे पुरः ॥ ८२ ॥ गंधेन मयकाज्ञायि । व्याघ्रोऽयं मानुषोऽभवत्
॥ तन्मह्यमेनं देहि त्वं । यथा भक्ष्यं भवेन्मम ॥ ८३ ॥ अनर्पयति योगींद्रे । संग्रामोऽभूत्त-
योर्मिथः ॥ त्रिशूलेन हतः शीर्षे । नृचक्षा मृत्युमाप्तवान् ॥ ८४ ॥ अथ द्वितीयं यक्ष—स्ते-
नापि स्वीयमायया ॥ रूपं मत्स्येंद्रनाथस्य । योगिनो विदधे तदा ॥ ८५ ॥ योगी व्याघ्रात्स-
मुत्तीर्णो । दृष्ट्वा मत्स्येंद्रयोगिनं ॥ नमस्करोति तं याव—त्तावद्व्याघ्रः प्रणष्टवान् ॥ ८६ ॥ कृ-
त्वा प्रणाममूर्ध्वं स । यावत्पश्यति भक्तिभाक् ॥ तावन्न योगी न व्याघ्रो । विखिन्नः सोऽ-
पि मानसे ॥ ८७ ॥ द्वितीयः कर्बुरः सोऽथ । व्याघ्रमादाय यातवान् ॥ यांतौ निरीक्ष्य तौ 
योगी । पृष्टे लग्नोऽप्यधावत ॥ ८८ ॥ कुत्रापि विवरे तौ द्वौ । प्रविष्टौ ज्ञायते न तत् ॥ तत्रै-
व विपिने सोऽस्था—द्योगी कूटकलानिधिः ॥ ८९ ॥ व्याघ्रो नृचक्षसाथोक्तः । करोमि त्वां पु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नरं ॥ वचोऽन्नावात्ततस्तेन । कर्बुरस्य कृता नतिः ॥ ए० ॥ एकस्य वटवृक्षस्य । पुष्पमा-
नीय सत्वरं ॥ स गंधं ग्राहितो व्याघ्रः । पुनर्मानुष्यमाप्तवान् ॥ ए१ ॥ निर्ययौ कंदरामध्या-
द्वनमध्ये भ्रमन्नथ ॥ वनं सुगंधं कुर्वाणं । दृष्टवान् गंधजाहकं ॥ ए२ ॥ तं गृहीतुमनाः पृ-
ष्ठौ । स जगाम कुतूहली ॥ केनाप्यदृश्यरूपेण । निषिद्धोऽप्येष न स्थितः ॥ ए३ ॥ स्थितः
स गात्रसंकोची । समागत्यास्य सन्निधिं ॥ जग्रहे सचिवेनापि । कराभ्यां सहसैव सः ॥
॥ ए४ ॥ तदीयकरसंयोगा—न्मार्जारो योग्यनूत् क्षणात् ॥ योगिनोल्लासितस्तेन । मंत्री ग-
गनमन्यगात् ॥ ए५ ॥ वलमानः पृथिव्यां स । न पपात कथंचन ॥ तदेति योगिना प्रोक्तं ।
रोषाकुलितचेतसा ॥ ए६ ॥ मया तेऽदृश्यन्नावोऽय—मुपकारकृते कृतः ॥ राक्षसेन समं त्वं
च । प्रणष्टो मम पार्श्वतः ॥ ए७ ॥ सदैव कथितं चेन्मे । कुरुषेऽथाविशंकितः ॥ नत्तारया-
मि तदहं । त्वामद्य गगनांगणात् ॥ ए८ ॥ त्वदीयं वचनं सर्वं । विधास्यामीति जल्पिते ॥
अपतत्स धरापीठे । योगिनोऽग्रेतिसाहसी ॥ एए ॥ चेलतुस्तौ ततः स्थाना—न्नतो वनम-
ध्यतः ॥ अपश्यतां क्वचित्स्थाने । कृष्णचित्रकवल्लरीं ॥ ४०० ॥ समुद्यतौ तदादाने । यदा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तौ योगिमंत्रिणौ ॥ नूतसंघातमध्यस्थ—स्तदैको नूत उचिवान् ॥ १ ॥ विना रक्तबलिं नैषा। ग्रहीतुं शक्यते लता ॥ इगादुग्रहीष्यथश्चेन्हा । तदाऽजीवौ भविष्यथः ॥ २ ॥

इत्युक्ते योगिना तेन । सचिवस्य शरीरतः ॥ रक्तं निष्कासितं नूरि । तस्यै नूताय चार्पितं ॥ ३ ॥ लग्नौ यावद्ग्रहीतुं तां । तावदादाय नूतराट् ॥ चचाल चान्वधाविष्टां । तौ पश्यंतौ च वल्लरीं ॥ ४ ॥ गिरेर्मध्येऽस्ति विवरं । यम्मवक्त्रेण सन्निनं ॥ द्वारयंत्रं समुद्घाट्य । तत्र नूतः प्रविष्टवान् ॥ ५ ॥ तत्र तावप्यनुगतौ । तत्रैकं कुंममागतं ॥ जलांतर्यातवान् नूत । नपकंठे च तौ स्थितौ ॥ ६ ॥ स्वस्मिंमथ सचिवे मंत्र—मुद्रां दत्वातिबंधुरां ॥ गतौ जलांतः सोपान—पंक्तिं तावप्यपश्यतां ॥ ७ ॥ तामुल्लंघ्य च पाताल—पुरसीम्नि समागतौ ॥ अपश्यतां प्रौढतरं । प्रासादं सप्तनूमिकं ॥ ८ ॥ नूतः करस्थवल्लीकः । प्राविशत्तत्र मंदिरे ॥ तत्रोपविष्टमास्ते च । योगिनीचक्रमुद्धतं ॥ ९ ॥ राक्षसास्तत्प्रतिहारा । लब्ध्वागंधं तयोर्द्रुतं ॥ लोलजिह्वा अधावंत । मांसास्वादनलंपटाः ॥ १० ॥ स्तंनयित्वाथ योगी तान् । प्राविशन्मंदिरांतरे ॥ योगिनीनां पुरः ख्यातं । तस्य नूतस्य चेष्टितं ॥ ११ ॥ योगिनीचक्रमाचख्यौ ।

द्वात्रिंशल्लक्षणैर्युतं ॥ मनुष्यं दीयते हत्वा—मुष्मै निर्भयचेतसे ॥ १२ ॥ वल्लरीयं ततो ल-
भ्या—धिष्टातास्या अयं यतः ॥ स्वछंदगामी लीलावान् । भूतो भैरवनामभृत् ॥ १३ ॥ स-
चिवेन ततः खड्ग—माकृष्य निदधे द्रुतं ॥ स्वकंठे योगिनीचक्रं । संतुष्टं तावदूचतुर्जगौ ॥ १४ ॥
मार्गेण येनागछस्त्वं । पश्चात्तेनैव तु व्रज ॥ अस्मत्प्रभावतो मार्गे । सुखेनैव गमिष्यसि
॥ १५ ॥ यस्माद्वनात्समायात—स्तस्मिन्नेव हि गछ भोः ॥ नरवृक्षाह्वनप्राप्ति—स्तत्रावश्यं भ-
विष्यति ॥ १६ ॥ एकयाथ रहः ख्यातं । देव्या तस्य तु मंत्रिणः ॥ केनापि त्वमुपायेन । यो-
गिनः संगितिं त्यज ॥ १७ ॥ नरवृक्षं यदा पश्ये—स्तदा नीरेण कल्पनं ॥ त्वमस्य कुर्या इ-
यता। स्वयमेव मरिष्यति ॥ १८ ॥ नरवृक्षप्रभावस्तु । सर्वोऽपि कथितः पुनः ॥ ततोऽसौ नि-
र्ययौ कुंडा—ध्वना साकं च योगिनः ॥ १९ ॥ द्वारयंत्रमतिक्रम्य। पुनस्तद्द्वारमाप्तवान् ॥ यो-
गींद्रः सचिवश्चापि । भ्रमंतौ स्त इतस्ततः ॥ २० ॥ नरवृक्षं मार्गयंतौ । लभेते क्वापि तौ न
हि ॥ कुंडद्वितीयमध्यस्थं । प्रासादं चाप्यपश्यतां ॥ २१ ॥ तन्मध्ये पार्श्वनाथस्य । प्रतिमा-
स्ते मनोरमा ॥ पातालाधिपनागस्य । फणैः सप्तभिरंकिता ॥ २२ ॥ तं प्रणम्य जगन्नाथं ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तौ बाह्ये रंगमंमपे ॥ वातायनसमासीनौ । पश्यंतौ स्तो जिनालयं ॥ २३ ॥ यत्कुंमयुग्मं त-
त्रास्ते । सोपानश्रेणिमंमितं ॥ तयोश्चैकत्र शीतांबु । द्वितीयेऽप्युष्णमेव च ॥ २४ ॥ तयोः
प्रपश्यतोस्तत्र । द्युसदां सार्थ्र आययौ ॥ झंपां वितीर्णवानुष्ण–जलकुंभेऽतिसोद्यमः ॥ २५ ॥
तज्जलस्नानसंयोगा–द्देवा वानरतां गताः ॥ वानर्यश्चाभवन् देव्यः । कृतः किलकिलारवः ॥
॥ २६ ॥ गंधोत्कटानि पुष्पाणि । फलानि सरसानि च ॥ मुख्यवानरवाक्येन । निन्युस्तत्रा-
परे समे ॥ २७ ॥ वानरीभिः समानीत–नीरपूरेण वानराः ॥ चक्रुः स्नात्रं जिनेंद्रस्य । पूजां
च कुसुमोत्करैः ॥ २८ ॥ गीतरागप्रपंचेन । वादित्रैश्च मनोरमं ॥ देवनाटकसंकाशं । नाटकं
तत्र च कृतं ॥२९॥ द्रव्यपूजां भावपूजां । विधाय कपयः समे ॥ रंतुं प्रवृत्ताः सर्वत्र । स्वेच्छ-
या वनमध्यतः ॥ ३० ॥ चिरं रंत्वाथ संध्यायाः । समये कपयः समे ॥ झंपां ददुः शीतज-
ल–कुंभेऽतिबहुविस्तृते ॥ ३१ ॥ तत्प्रभावाच्च ते सर्वे । देवत्वं प्रापुरादिवत् ॥ स्वेच्छया विचरं-
तश्च । कुत्रापि स्थानके गताः ॥ ३२ ॥ तौ तथैव स्थितौ तत्र । प्रासादे योगिमंत्रिणौ ॥ पु-
नर्द्वितीयदिवसे । तथैव तदपश्यतां ॥ ३३ ॥ मंत्रिणा भणितं योगिन् । कपिमध्ये व्रजाम्य-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हं ॥ कपिरूपभृदद्य त्वं । यथाख्यासि समाहितः ॥ ३४ ॥ यथादोमध्यसंस्थोऽहं । पश्यामि
सकलांस्तरून् ॥ भाग्यसंयोगतो जातु । नरवृक्षोऽपि लभ्यते ॥ ३५ ॥ आदेशाद्योगिनो मं-
त्री । कुंभे ऊर्ध्वं प्रदत्तवान् ॥ वानररूपमाधाय । निर्ययौ कपिमध्यगः ॥ ३६ ॥ चैत्यपूजा-
दिकं कृत्वा । रममाणेषु तेषु च ॥ मुख्यवानरपत्नी स्वं । पतिं पप्रच्छ वाग्मिनं ॥ ३७ ॥ स्वा-
मिन् किं नरवृक्षोऽस्ति । वृक्षेष्वेतेषु बंधुरः ॥ यस्य दुग्धप्रमाणेन । ज्ञायते भूगतं धनं ॥ ३८ ॥
प्राह सोऽप्येहि मे सार्थे । यथा तद्दर्शयामि ते ॥ इत्युक्त्वा तच्चचालाशु । मिथुनं विपिनौक-
सः ॥ ३९ ॥ अन्वयासीन्मंत्रिकपि–स्तद्युग्मं लीलयोच्छलत् ॥ उपाविशंस्त्रयो गत्वा । नरवृ-
क्षोपरि स्थिराः ॥ ४० ॥ कपिर्वाग्मी जगौ भार्यां । प्रिये सोऽयं नरद्रुमः ॥ नाप्यते यो नृ-
भिर्दत्तं । विना सल्लक्षणं नरं ॥ ४१ ॥ तमुपालक्षयन्मंत्रि–कपिश्चिह्नैरनेकशः ॥ गतेषु तेषु
संस्थानं । मंत्री स्वरूपमातनोत् ॥ ४२ ॥ आख्यातं योगिनोऽग्रे च । चलितौ तावुभावपि
॥ तस्मिन्नरद्रुमे रम्ये । संजातेऽभ्यर्णवर्त्तिनि ॥ ४३ ॥ नीरेण मंत्रिणा योगी । कल्पितः पृ-
थ्वीवर्त्तिना ॥ वृक्षाधिष्टायकैर्देवैः । स सद्यो भक्षितो रटन् ॥ ४४ ॥ अंगरक्षोऽथ सचिव—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनालोक्येत्यचिंतयत् ॥ निन्ये कौतुकभंडारे । स्वामी मे योगिना ध्रुवं ॥ ४५ ॥ मायावि-
ना गृहीतोऽसौ । मारणायैव केवलं ॥ पृष्टौ यास्याम्यहमपि । तत्पादौ शरणं मम ॥ ४६ ॥
इति ध्यात्वाचलत्सोऽपि । भ्रमंस्तद्वनमासदत् ॥ धर्मकर्मानुसारेण । प्राप्तवान् स्वामिनं नि-
जं ॥ ४७ ॥ तौ मिथो मुदितौ दोर्भ्या–माशिश्लिषतुरंजसा ॥ अंगरक्षधनुर्लात्वा । मंत्री बा-
णं च संदधे ॥ ४८ ॥ व्याघ्रवृश्चिकसर्पाणां । भूतकेसरिदंतिनां ॥ रूपैः स भापितोऽत्यर्थं ।
मानसे न भयं दधौ ॥ ४९ ॥ नरडुस्कंधदेशोऽस्ति । स्वयं भूतं मनोहरं ॥ पुंस्त्रियोर्मिथुनं प्रौ-
ढं । सर्वावयवसंयुतं ॥ ५० ॥ बाणं मुक्तं ततस्तेन । तत्र नारीपयोधरे ॥ प्रादुर्बभूव सहसा
। पयःश्रोतः सुपूरभृत् ॥ ५१ ॥ तत्पीतं मंत्रिणात्यर्थं । प्रीतोऽभूद्भूरिभिर्दिनैः ॥ स्वयमेव
स्थितो दुग्ध–प्रवाहः प्रवहन्नथ ॥ ५२ ॥ पीतदुग्धप्रमाणेन । सर्वं भूमिगतं धनं ॥ द्राक् प-
श्यतिस्म मंत्रींद्रः । स्वाक्षिभ्यां प्रकटं यथा ॥ ५३ ॥ इत्थमंजनसिद्धोऽभू–न्मंत्रीशो भाग्ययो-
गतः ॥ सोत्साहस्तद्वनं सर्व–मतिचक्राम हेलया ॥ ५४ ॥ सांगरक्षो ययौ तूर्णं । श्रावस्त्यां
पुरि साहसी ॥ पुरोपवनसंस्थश्च । केशी दृष्टो गणाधिपः ॥ ५५ ॥ रत्नत्रयधरो धीमान् ।

For Private and Personal Use Only

धीरो धर्मोपदेशकः ॥ ततो मंत्र्यंगरक्षौ च । समासीनौ च तत्पुरः ॥ ५६ ॥ आख्यातं मुनि-
ना किंचि-त्तदा तत्पुरतः स्फुटं ॥ मया किंचित्तु न ज्ञातं । मूर्खत्वभावेन सुंदर ॥ ५७ ॥ मंत्रि-
पार्श्वे ततः पृष्टं । सेवकेनातियत्नतः ॥ किं ख्यातं मुनिना तेन । तवाग्रे वद मे पुरः ॥ ५८ ॥
प्रस्तावे कथयिष्यामि । सर्वं ते पुरतोऽधिकं ॥ इत्येव कथयन्नासी-न्नाख्यातं किंचिदेव हि ॥
॥ ५९ ॥ गणभृद्बोधवाक्येन । त्वं श्रीश्रेणिकमंत्र्यभूः ॥ अज्ञातबोधवाक्यः स-न्नहं वैभार-
पर्वते ॥ ६० ॥ एतत्स्वप्नमसत्यं वा । सत्यं तद् ज्ञायते नहि ॥ पुनः पृच्छां करिष्यामः ॥ श्री-
वीरजिनसन्निधौ ॥ ६१ ॥

इत्युक्त्वा तेऽचलन् सर्वे । श्रीवीरनतिहेतवे ॥ आहूता रौहिणेयेन । लोकाश्च समतात्म-
ना ॥ ६२ ॥ आनाय्य वैभारगिरे-र्हृतं पितृपितामहैः ॥ अर्पितं वस्तु लोकानां । श्रेणिकस्य
प्रपश्यतः ॥ ६३ ॥ श्रीवीरस्वामिनं नत्वा-ऽभयः पप्रच्छ मंत्रिराट् ॥ ख्यातो मे रौहिणेयेन ।
भवः सत्योऽथवाऽनृतः ॥ ६४ ॥ सत्य एव न कूटोऽयं । वीरेण कथिते त्विति ॥ रौहिणेयोऽ-
पि जग्राह । दीक्षां श्रीवीरसन्निधौ ॥ ६५ ॥ प्रशंसमानः सर्वोऽपि । लोको निजनिजं गृहं ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जगाम दुस्तपतपो । रौहिणेयस्तपस्यति ॥ ६६ ॥ श्रीवीरदेवमूर्त्ति—क्रमवंदनतत्परः स चौर-
र्षिः ॥ न्नविकमनांसि निरंतर—मचोरयत्स्वीयविमलगुणैः ॥ ६७ ॥ गृहीत्वानशनं प्रांते । स्म-
रन् पंचनमस्कृतिं ॥ श्रीसर्वार्थविमानेऽगा—देवोऽनूद्धर्मनाजनं ॥ ६८ ॥ जिनेंद्रवचनंश्रुत्वा ।
रौहिणेय इवान्वहं ॥ स्तैन्यं त्रिधापि संत्याज्यं । जिनधर्मरतैर्नरैः ॥ ६९ ॥ कासहृगच्छचूडा—
रत्ननिन्नो देवचंद्रगुरुराजः ॥ तच्छिष्यदेवमूर्त्ति—र्जिनपदतरुपीठकृतवसतिः ॥ ७० ॥ चक्रे तेन
कथासौ । बहुलरसा स्मयकरी बुधजनानां ॥ नंदतु तावच्चिरा । यावच्छशिमेरुसूर्यजलनि-
धयः ॥ ७१ ॥

॥ इति श्रीकासहृगच्छे श्रीदेवचंद्रसूरिशिष्य नपाध्यायश्रीदेवमूर्त्तिरचिता
रौहिणेयकथा समाप्ता ॥

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

॥ श्रीरस्तु ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीरौहिणेयकथा संपूर्णा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only